SANSKRIT IN MEDIEVAL INDIA:

# RETRIEVING LOST TRADITIONS

Chief Editor

Prof. P.V. Narayanan

Editors

Dr. Pushpadasan Kuniyil

Rathika A. M.

All rights reserved. No part of this work may be reprouced, stored in a retrieval system or transmitted in any form or by any means, electronic, mechanical, photocopying, microfilming, recording or otherwise, without the prior written permission of the copyright owner and the publisher.

ISBN : 978-81-8315-500-7

First Published 2022

*Published by*
**New Bharatiya Book Corporation**
208, 2nd floor
Prakash Deep Building,
4735/22, Ansari Road, Darya Ganj,
New Delhi-110002
Ph. 23280214, 23280209, 49841634
E-mail : deepak.nbbc@yahoo.in

On Behalf of
**Department of Sanskrit Sahitya, & Research Forun Sahitya**
Sree Sankaracharya University of Sanskrit
Kalady, Kerala, India, PIN: 683574
Email: *rfsahitya@gmail.com*

*Laser Type Setting :*
**S.K. Graphics,** Delhi-84

*Printed at* : **S.K. Offset,** Delhi

... of Madhava of Saṅgamagrāma on the Mathematical Studies of Medieval Kerala 258
—*Athira K. Babu*
8. Equipments & Requirements for the Processing of Metals Referred to *Rasaratnasamuccaya* 265
—*Keerthana P.*
9. The Relevance of *Manuṣyālayacandrikā* as a Guideline for Sustainable Architecture 277
—*Vishnu M.*
10. The Mortar (sudhā) in *Bṛhatsaṃhita* and *Śilparatna* 281
—*Devahar V.*

## Philosophy

1. विशिष्टाद्वैतमतपरिचयः
—*डॉ. के. अनन्ता* 289
2. A Comparison of Sāṃkhya Philosophy with Vetharhirium 297
—*G. V. Bhanu Moorthy*
3. An Introduction to *Tattvacintāmaṇi* of Gaṅgeśopādhyāya 303
—*Sreelakshmi K.*

## Commentaries

1. In Perception of Perfection of the *Daśādhyāyī* Commentary on *Bṛhajjātaka* 311
—*Dr. C. K. Sujaikumar*
2. An Outlook on the Medieval Commentaries on *Amarakośa* 325
—*Preetha P. V.*
3. *Ānandavardhini*: A 17th Century Commentary on *Bhagavadgītā* 333
—*Akhil C. M.*

## Gender Representations

1. Women Reflected in Sanskrit Literature of Medieval Kerala : A Study based on *Kokilasandeśa* 341
—*Dr. T. Mini*

2.
3.
1.
2.
3.
4.
5.
6.

1

# विशिष्टाद्वैतमतपरिचयः

डॉ. के. अनान्ता

सव्यं पादं प्रसार्यश्रितदुरितहरं दक्षिणं कुञ्चयित्वा
जानुन्याधाय सव्येतरमितरभुजं नागभोगे विधाय ।
पश्चाद्बाहुद्वयेन प्रतिभटशमने धारयन्शंखचक्रे
देवीभूषादिजुष्टो जनयतु जगतां शर्मवैकुण्ठनाथः ।।

इति पुराण श्लोकोक्तरीत्या श्रीवैकुण्ठे विराजमानः नित्यलीलाविभूतिद्वयनायकः श्रीमन्नारायणः ब्रह्माण्डप्रलयान्तिमकाले अचिदविशिष्टान् जन्तून् अवलोक्य जातनिर्वेदस्सन् इमं विश्वं सृजति। किञ्च सः भगवान् नारायणः सृष्टिकाले चतुर्मुखाय संपूर्णं वेदचतुष्टयं उपदिष्टवान्।

सः वेदः अपौरुषेयः तथाहि कालिदासादिमनुष्यप्रणीतरघुवंशादिग्रन्थवत् अस्मिन् वेदे भ्रमप्रमादादिदोषः नास्ति। अतएव कदापि जनानां वेदे उपेक्षाबुद्धिः न जायते। (एवञ्च कालिदासादिकृतरघुवंशादिग्रन्थः भ्रमप्रमाददः विप्रलम्भसंभवनार्हविषयः।) न हि वेदस्य कर्ता कश्चित् उपलभ्यते। अतो वेदः अपौरुषेयः अनादिनिधनः अविच्छिन्नसम्प्रदायागतः अनन्तः स्वर - वर्ण - मात्र बलादिभिरेकरूपेण अध्येयश्च श्रूयते लोके निखिलैः मनुष्यैरिति।

ननु यथा रथगोपुरादिरामायण - महाभारत - रघुवंशादिश्च कैश्चित् बुद्धिमद्भिः कृतं दृष्टम्। तथा वेदोऽपि पुण्यपुरुषेण विरचितः। तथा च वेदः पौरुषेयः एव इति चेत् न शिष्यः गुरुमुखात् वेदं - अध्येति इति तु वयं जानीमः। एवमेव प्राचीनकालादारभ्य अध्ययनपरम्परा वर्तते। अर्थात् रामायण - महाभारवत् रघुवंशादिलौकिकग्रन्थानां श्रीवाल्मीकि - श्रीव्यासकालिदासादयः कर्तार इति यथा उपलभ्यते तथा वेदस्य कर्ता नोपलभ्यते। यद्यपि काठकं कालापकम् इत्यादयः भागाः वेदे दृश्यन्ते तथापि ते भागाः कठ - कालापकृताः न भवन्ति। किन्तु तैः कठ - कालापादिभिः महापुरुष कृत प्रवचनम् आधारीकृत्य काठकं